स तु द्रव्यान्तरयोगेन महाद्रावको भवति यथा,
"नरसारयवक्षारस्फटिकारित एव काचवकयन्त्रैः।
बहुशः पात्यं सत्त्वं तद्धि महाद्रावकं नाम॥"
इति रत्नावली॥

यथाच वैद्यकभैषज्यधन्वन्तरिग्रन्थे यकृत्प्लीहाधिकारे।
"इयचिञ्चमपामार्गं चिञ्चा कुष्माण्डनाडिका।
स्नुही तालस्य पुष्पाणि वर्षाभूर्वेतसन्तथा॥
एतेषां क्षारमाहृत्य निम्बाकसरसेन च।
क्षालयित्वा क्षारतोयं वस्त्रपूतञ्च कारयेत्।
चण्डातपेन संशोष्य ग्राह्यन्तद्द्रवणोचितम्।
एतस्य द्विपलं ग्राह्यं यवक्षारपलद्वयम्॥
स्फटिकारिपलञ्चैव नरसारपलन्तथा।
पलार्द्धं सैन्धवं ग्राह्यं टङ्कणं तोलकद्वयम्॥
कासीसं तोलकञ्चैव शुद्धाभ्रकञ्च तोलकम्।
दारुमोचं कर्षकञ्च तोलं समुद्रफेनकम्॥
सर्व्वमेकत्र सञ्चूर्ण्य वकयन्त्रेण साधयेत्।
महाद्रावकमेतद्धि योज्यञ्च रसजारणे॥
हन्ति गुल्मादिकान् रोगान् यकृत्प्लीहोदराणि च॥")

नरसिंहः, पुं, (नर इव सिंह इव च आकृतिर्यस्य।) विष्णुः। इति शब्दरत्नावली॥ स तु हिरण्यकशिपुवधार्थं भगवद्दशावतारान्तर्गतचतुर्थः पूर्णावतारः। इति वराहपुराणम्॥ (नरेषु सिंहः। नरः सिंह इव इत्युपमितसमासो वा।) नरश्रेष्ठः। यदुक्तम्।
"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्द्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः॥"
इति विशेष्यनिघ्ने अमरः॥
(यथा, महाभारते। १०। १०। १६।
"क्रुद्धस्य नरसिंहस्य संग्रामेष्वपलायिनः।
ये व्यमुच्यन्त कर्णस्य प्रमादात्त इमे हताः॥")

नरहरिः, पुं, (नरः इव हरिः सिंह इव च आकृतिर्यस्य।) नृसिंहावतारः। यथा,—
"केशव धृतनरहरिरूप जय जगदीश हरे॥"
इति गीतगोविन्दे। १। ८॥

नराधिपः, पुं, (नराणामधिपः।) नराधिपतिः। राजा। यथा, "नराणाञ्च नराधिपः।" इति श्रीभगवद्गीता॥ (वृक्षविशेषः। यथा, सुश्रुते चिकित्सितस्थाने ३७ अध्याये।
"काकोलीद्वययष्ट्याह्वमेदायुग्मनराधिपैः॥")

नरान्तकः, पुं, (नराणां अन्तको नाशकः।) राक्षसविशेषः। स तु रावणपुत्त्रः। इति रामायणम्॥ (यथा, भागवते। ६। १०। १८।
"रक्षःपतिस्तदवलोक्य निकुम्भकुम्भ-
धूम्राक्षदुर्म्मुखसुरान्तनरान्तकादीन्॥")

नरायणः, पुं, (नराणां जीवानां अयनं आश्रयस्थानम्।) श्रीनारायणः। इति शब्दरत्नावली॥

नरी, स्त्री, (नरस्य पत्नी। ङीष्।) नारी। इति जटाधरः॥

नरेन्द्रः, पुं, (नर इन्द्र इव नराणामिन्द्रो वा।) राजा। (यथा, मनुः। ९। २५३।
"रक्षणादार्य्यवृत्तानां कण्टकानाञ्च शोधनात्।
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः॥")
विषवैद्यः। इति मेदिनी। रे, १७१॥ (यथा, माघे। २। ८८।
"सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः॥"
वृक्षविशेषः। यथा, सुश्रुते चिकित्सितस्थाने। ६ अध्याये।
"पूतीकार्कस्नुङ्नरेन्द्रद्रुमाणां
मूत्रैः पिष्टाः पल्लवाः सौमनाश्च॥"
एकविंशत्यक्षरवृत्तिविशेषः। इति चिन्तामणिः॥ यथा,—
"चामररत्नरज्जुवरपरिगतविशणाहितशोभः
पाणिविराजिपुष्पयुगविरचितकङ्कणसङ्गतगन्धः।
चारुसुवर्णकुण्डलयुगलकृतरोचिरलङ्कृतवर्णः
पिङ्गलपन्नगेश इति निगदति राजति वृत्तनरेन्द्रः॥")

नर्कुटकं, क्ली, नासिका। इति हेमचन्द्रः॥

नर्त्तकः, पुं, (नृत्यतीति। नृत्+"शिल्पिनि ष्वुन्।" ३। १। १४५। इति ष्वुन्।) नटः। पीठमर्दः। चारणः। कैलकः। नटपर्य्यायः। सर्व्ववेशी २ लयालम्बः ३ तालरेचनकः। इति शब्दरत्नावली॥ द्विपः। इति हेमचन्द्रः॥ नृत्यकर्त्तुर्लक्षणं यथा,—
"यादृशं नृत्यपात्रं स्यात्प्रोक्तं योज्यञ्च तादृशम्।
नृत्यस्य धारणात् पात्रं नर्त्तकः परिकीर्त्तितः॥"
अपि च।
"असम्बद्धप्रलापी च सदा भ्रूकुटितत्परः।
हासप्रहासचतुरो वाचालो नृत्यकोविदः॥"
इति सङ्गीतदामोदरः॥
(नर्त्तयतीति। नृत्+णिच्+ण्वुल्। नृत्यकारके, त्रि। यथा, साहित्यदर्पणे ३ परिच्छेदे।
"तर्को विचारः सन्देहात् भ्रूशिरोऽङ्गुलि-
नर्त्तकः॥")

नर्त्तकी, स्त्री, (नृत्यतीति। नृत्+ष्वुन्। षित्वात् ङीष्।) नृत्यकारिणी। बाइ इति भाषा॥ तत्पर्य्यायः। लासिका २। इत्यमरः। १। ७। ८॥ लयपुत्त्री ३ नटी ४ लस्या ५। इति शब्दरत्नावली॥ (यथा, रघुः। १९। १४।
"नर्त्तकीरभिनयातिलङ्घिनीः
पार्श्ववर्त्तिषु गुरुष्वलज्जयत्॥")
करेणुः। इति मेदिनी। के, १०८॥ नलिकानामसुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

नर्त्तनं, क्ली, (नृत्+भावे ल्युट्।) नृत्यम्। इत्यमरः। १। ७। १०॥ (यथा, मनुः। २। १७८।
"कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्॥"
नृत्यतीति। नृत्+ल्युः। नर्त्तके, त्रि। यथा, महाभारते। ४। ३५। २२।
"गायनो नर्त्तनो वापि वादनो वा पुनर्भव।
क्षिप्रं मे रथमास्थाय निगृह्णीष्व हयोत्तमान्॥")

नर्द्द, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) नर्द्दति। इति दुर्गादासः॥

नर्द्द, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्॥)

नर्द्दटकं, क्ली, छन्दोविशेषः। तस्य लक्षणं यथा,—
"यदि भवतो नजौ भजजला गुरुनर्द्दटकम्॥"
इति छन्दोमञ्जरी॥

नर्ब्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वां परं-सकं-सेट्।) रेफोपधः। नर्ब्बति। इति दुर्गादासः॥

नर्म्म, [न्] क्ली, (नॄ नये+"सर्व्वधातुभ्यो मनिन्।" उणां ४। १४६। इति मनिन्।) परीहासः। इत्यमरः। १। ७। ३२॥ (यथा, महाभारते। १। ८२। १७।
"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि॥")

नर्म्मकीलः, पुं, (नर्म्मणः परीहासस्य कील इव।) पतिः। इति त्रिकाण्डशेषः॥

नर्म्मटः, पुं, (नर्म्मणेव अटति गच्छतीति। अट+अच्। शकन्ध्वादित्वात् साधुः।) खर्परः। सूर्य्यः। इति हारावली। २५४॥

नर्म्मठः, पुं, (नर्म्मणि कुशलः। नर्म्म+अठच्।) चूचुकम्। विड्गः। परीहासरतः। इति शब्दरत्नावली॥

नर्म्मदः, पुं, (नर्म्म ददातीति। दा+कः।) केलिसचिवः। इति मेदिनी। दे, ३३॥

नर्म्मदा, स्त्री, (नर्म्म ददातीति। दा+कः। स्त्रियां टाप्।) रेवा। इति हेमचन्द्रः। ४। १४९॥ नदीविशेषः। सा विन्ध्यपर्व्वतान्निःसृता पश्चिमे तमसानद्यां प्रविष्टा। तस्याः पर्य्यायः। रेवा २ मेकलकन्या ३ सोमसुता ४। अस्या जलगुणाः। लघुत्वम्। शीतलत्वम्। सुपथ्यत्वम्। दाहपित्तशमनत्वम्। वातदाहत्वञ्च। इति राजनिर्घण्टः॥ * ॥ तस्या जलं दशभिर्म्मासैर्जीर्य्यति। यथा,—
"त्रिभिः सारस्वतं तोयं सप्तभिस्तच्च यामुनम्।
नार्म्मदं दशभिर्म्मासैर्गाङ्गं वर्षेण जीर्य्यति॥"
इति प्रायश्चित्ततत्त्वम्॥
तस्या उत्पत्तिमाहात्म्ये यथा,—
"नर्म्मदा सरितां श्रेष्ठा रुद्रदेहाद्विनिःसृता।
तारयेत् सर्व्वभूतानि स्थावराणि चराणि च॥
सर्व्वपापहरा नित्यं सर्व्वदेवनमस्कृता।
संस्तुता देवगन्धर्व्वैरप्सरोभिस्तथैव च॥" * ॥
तस्याः स्तवो यथा,—
"नमः पुण्यजले! आद्ये! नमः सागरगामिनि!
नमस्ते पापशमनि! नमो देवि! वरानने!॥
नमोऽस्तु ते ऋषिगणसंघसेविते!
नमोऽस्तु ते शङ्करदेहनिःसृते!।
नमोऽस्तु ते धर्म्मभृतां वरप्रदे!
नमोऽस्तु ते सर्व्वपवित्रपावने!॥
यस्त्विदं पठते स्तोत्रं नित्यं शुद्धमना नरः।
ब्राह्मणो वेदमाप्नोति क्षत्त्रियो विजयी भवेत्॥
वैश्यस्तु लभते लाभं शूद्रश्चैव शुभां गतिम्।
अन्नार्थी लभते ह्यन्नं स्मरणादेव नित्यशः॥
नर्म्मदां सेवते नित्यं स्वयन्देवो महेश्वरः।